# 2.6.2 (QIM)

- एतेषां पाठ्यक्रमाणाम् आधारेण सत्रान्तपरीक्षायाः अनन्तरं विद्यार्थिनां कृते विश्वविद्यालयेन उपाधिः प्रदीयते। एतस्याः परीक्षायाः आधारेण एतत् सुनिश्चितं क्रियते यत् विभिन्नपाठ्यक्रमाणां परिणामाः, पाठ्यक्रमाणां विशिष्टाः परिणामाः, पाठ्यपत्राणां च परिणामाः छात्रैः कियता परिमाणेन प्राप्ताः सन्ति। परीक्षायाः एतन्महत्त्वाधारेण विश्वविद्यालये एका समीचीना परीक्षाप्रक्रिया अस्ति। यत्र विश्वसनीया परीक्षापद्धतिः, विश्वसनीया मूल्याङ्कनप्रणाली, यथासमयं परीक्षापरिणामस्य उद्घोषणा इत्यादिकम् अस्याः उद्देश्यानि सन्ति। अयं विश्वविद्यालयः एतानि उद्देश्यानि पूरयितुं सर्वविधां व्यवस्थां करोति।
- विश्वविद्यालयेन छात्राणां कृते उत्तरपुस्तिकानां पुनः मूल्याङ्कनाय विकल्पः दीयते।
- एतासां परीक्षाणां सुचारुसञ्चालनाय विश्वविद्यालयेन विश्वविद्यालय-अनुदान-आयोगस्य मार्गदर्शिकानुसारं, राज्यसर्वकारस्य नियमानुगुणं च परीक्षासम्बन्धिनः नियमाः निर्धार्यन्ते।
- एतेषु नियमेषु नमनीयता (flexibility) अपि वर्तते यत्र अपेक्षानुसारं, समयानुसारं च परिवर्तनानि भवितुम् अर्हन्ति।

## ❖ सततरूपेण आन्तरिकमूल्याङ्कनम् -

- सर्वेषां पाठ्यक्रमपरिणामानां, पाठ्यक्रमविशिष्टपरिणामानां, पाठ्यपत्रपरिणामानां च मूल्याङ्कनं कर्तुं विश्वविद्यालयः छात्राणां सततरूपेण आन्तरिकं मूल्याङ्कनं करोति।
- प्रत्येकं पाठ्यपत्रस्य आन्तरिकमूल्याङ्कने विश्वविद्यायलेन सम्पूर्णरूपेण पारदर्शिता परिपाल्यते। यत्र उपस्थितेः आधारेण, प्रदत्तस्वाध्यायकार्यस्य आधारेण, लिखितपरीक्षायाः आधारेण च अङ्काः प्रदीयन्ते।

छात्रस्य पाठ्यक्रमपरिणामस्य, पाठ्यक्रमविशिष्टपरिणामस्य, पाठ्यपत्रपरिणामस्य च मूल्याङ्कनं आन्तरिकपरीक्षायां प्राप्तैः अङ्कैः, सत्रान्तपरीक्षायां प्राप्तैः अङ्कैः, वाक्यार्थपरिषदि छात्रस्य प्रदर्शनेन, सम्मेलनेषु, सङ्गोष्ठीषु, स्वाध्यायकार्येषु, क्षेत्रीयकार्येषु च छात्रस्य प्रतिभागिताधारेण क्रियते।